# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – सर्वदर्शनम् (ऐच्छिकम्) | **कोड – CE-4.1.1** | समयः – ०३ तः ०६ पर्यन्तम् |
| दिनाङ्कः – ०९/१२/२०१६ | सन्दर्भग्रन्थः – पञ्चदशी (४-६ प्रकरणानि) | |

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत।** **०४**

(१) ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते
विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत् ॥

(२) सत्येवं विषयौ द्वौ स्तो घटौ मृन्मयधीमयौ।
मृन्मयो मानमेयः स्यात् साक्षिभास्यस्तु धीमयः ॥

**प्रश्नः – २ एकस्योत्तरं देयम्।** **१२**

(१) जीवसृष्टं द्वैतमेव बन्धस्य हेतुरिति पञ्चदशीरीत्या प्रतिपादयत

(२) ईश्वरसृष्टजगतः वर्णनं यथाग्रन्थं कुरुत।

**प्रश्नः – ३ द्वयोः उत्तरं यथाग्रन्थं देयम्।** **०४**

(१) सप्तान्नम्।

(२) द्विविधं जीवद्वैतम् ।

(३) पञ्चदशी इति नामाभिधानम्।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत।** **०४**

(१) येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च
स्वाद्वस्वादू विजानाति तत्प्रज्ञानमुदीरितम् ॥

(२) एकमेवाद्वितीयं सन्नामरूपविवर्जितम्।
सृष्टेः पुराऽधुनाप्यस्य तादृक्त्वं तदितीर्यते ॥

**प्रश्नः – ५ एकस्योत्तरं देयम्।** **०८**

(१) ब्रह्मणि जगतः आरोपः, ज्ञानेन तस्य निवृत्तिश्च यथाग्रन्थम् उपपादयत।

(२) "तत्त्वमसि" इति महावाक्यस्य अद्वैतवेदान्तदृष्ट्या निरूपणं कुरुत।

**प्रश्नः – ६ त्रीन् प्रश्नान् उत्तरत।** **०३**

(१) परमात्मनि कति अवस्थाः विज्ञेयाः ? काः ताः ?

(२) पञ्चमप्रकरणस्य नाम किम् ?

(३) षष्ठप्रकरणस्य नाम किम् ?

(४) विद्या कति विधा? किं च तत् ?

(५) किं नाम अद्वैतम् ?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ७ एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत।** ०४

(१) आनन्दमयकोशो यः सुषुप्तौ परिशिष्यते
अस्पष्टाचित्स आत्मैषां पूर्वकोशोऽस्य ते गुणाः॥

(२) अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः।
ताभिः क्रोडिकृतं सर्वं तेन सर्वज्ञ इरितः॥

**प्रश्नः – ८ एकस्योत्तरं देयम्।** ०८

(१) आत्मनोऽस्तित्ववाद-नास्तित्ववादं यथाग्रन्थं प्रतिपादयत।

(२) ईश्वरस्य उपाधिभूतमायायाः वर्णनं कुरुत।

**प्रश्नः – ९ त्रीन् प्रश्नान् उत्तरत।** ०३

(१) कति कोशाः भवन्ति ?

(२) महतः परं किम् अस्ति ?

(३) नित्यज्ञानेच्छाप्रयत्नाः कस्य गुणाः वर्तन्ते ?

(४) पञ्चदश्यां कति प्रकरणानि सन्ति ?

(५) पञ्चदश्याः कर्ता कः?

## चतुर्थान्वितिः (Unit-४)

**प्रश्नः – १० एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत।** ०४

(१) आनन्दमय ईशोऽयं बहु स्यामित्यवैक्षत।
हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत्॥

(२) जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितम्।
मायया तदुपेक्ष्यैव चैतन्यं परिशेष्यताम्॥

**प्रश्नः – ११ एकस्योत्तरं देयम्।** १२

(१) तत्त्वज्ञानस्य फलं यथाग्रन्थं निबन्धयत

(२) भारतीयदर्शनेषु अद्वैतवेदान्तस्य वैशिष्ट्यं प्रदर्शयत।

**प्रश्नः – १२ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) कूटस्थः।

(२) ईश्वरः।

(३) माया।

***

## Answer Key

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – सर्वदर्शनम् (ऐच्छिकम्) **कोड – CE-4.1.1** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – ०९/१२/२०१६ सन्दर्भग्रन्थः – पञ्चदशी (४-६ प्रकरणानि)

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १**

**प्रश्नः – २**

**प्रश्नः – ३**
१. मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकम्। अन्यत्रितयमात्मार्थमन्नानां विनियोजनम्
२. शास्त्रीयम् अशास्त्रीयं च।
३. पञ्चदश प्रकरणानि सन्ति यस्मिन् तत्

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ४** १.

**प्रश्नः – ५**

**प्रश्नः – ६**
१. अवस्थाचतुष्टयम्। चिदन्तर्यामी सूत्रात्मा विराट्
२. महावाक्यविवेकप्रकरणम्
३. चित्रदीपविवेकप्रकरणम्।
४. द्विविद्या। परा अपरा च।
५. न विद्यते द्वैतं यस्मिन् तत् अद्वैतम्

### तृतीयान्वितिः (Unit-3)

**प्रश्नः – ७** १.

**प्रश्नः – ८** १.

**प्रश्नः – ९**
१. पञ्च
२. अव्यक्तम्।
३. ईश्वरस्य
४. पञ्चदश
५. विद्यारण्यमुनिः

### चतुर्थान्वितिः (Unit-4)

**प्रश्नः – १०**

**प्रश्नः – ११** १.

**प्रश्नः – १२** १.